रायो हलि। (८५/२८६)

[1]रै इत्येतस्य हलादौ विभक्तौ परतः आकारादेशो भवति। राभ्याम्। राभिः। हलि इति किम्? रायौ। रायः। विभक्तौ इति किम्? रैत्वम्। रैता। '[2]मृजेर्वृद्धिः' (७.२.११४/२४७३) इत्यतः प्राग्विभक्त्यधिकारः॥

युष्मदस्मदोरनादेशे। (८६/३९३)

युष्मदस्मदित्येतयोः [3]अनादेशे विभक्तौ परतः आकारादेशो भवति। युष्माभिः। अस्माभिः। युष्मासु। अस्मासु। अनादेशे इति किम्? युष्मत्। अस्मत्। हलि इत्यधिकारादप्यत्र न [4]स्यात्। उत्तरत्र तु अनादेशग्रहणेन प्रयोजनम् 'योऽचि' (७.२.८९/३९२) इति, तद् इहैव क्रियते॥

द्वितीयायां च। (८७/३९०)

द्वितीयायां[5] च परतः [6]युष्मदस्मदोः आकारादेशो भवति। त्वाम्। माम्। युवाम्। आवाम्। युष्मान्। अस्मान्। आदेशार्थं वचनम्॥

प्रथमायाश्च द्विवचने भाषायाम्। (८८/३८७)

प्रथमायाश्च द्विवचने परतो भाषायां विषये [7]युष्मदस्मदोः आकारादेशो भवति। युवाम्। आवाम्। प्रथमायाः इति किम्? युवयोः। आवयोः। द्विवचने इति किम्? त्वम्। अहम्। [8]यूयम्। वयम्। भाषायाम् इति किम्? 'युवं वस्त्राणि पीवसा वसाथे' (ऋ. १.१५२.१)॥

योऽचि। (८९/३९२)

अजादौ विभक्तौ [9]अनादेशे [10]युष्मदस्मदोः यकारादेशो भवति। त्वया। मया। त्वयि। मयि। युवयोः। आवयोः। अचि इति किम्? युवाभ्याम्। आवाभ्याम्। 'युष्मदस्मदोरनादेशे' (७.२.८६/३९६) इत्यत्र यदि हलि (७.२.८५/२८६) इति अनुवर्तते, [11]शक्यमकर्तुम् अचि इति एतत्? तत् क्रियते विस्पष्टार्थम्। अनादेशे इत्येव। त्वद् गच्छति। मद् गच्छति॥

शेषे लोपः। (९०/३८५)

शेषे विभक्तौ युष्मदस्मदोर्लोपो भवति। कश्च शेषः? यत्र आकारो यकारश्च न विहितः।

पञ्चम्याश्च चतुर्थ्याश्च षष्ठीप्रथमयोरपि।
यान्यद्विवचनान्यत्र तेषु लोपो विधीयते॥

---

1. विभक्तौ इति वर्तते इत्यधिकम् क. 2. वाक्यमिदं नास्ति ह. 3. अनादिष्टायाम् ब.इ. 4. भवति क. 5. विभक्तौ इत्यधिकम् इ.ड.क. 6. युष्मदस्मद् इत्येतयोः क. 7. युष्मदस्मद् इत्येतयोः क. इ. 8. यूयं वयम् नास्ति क. 9. परतः इत्यधिकम् क.इ. 10. युष्मदस्मद् इत्येतयोः क. 11. तदा इत्यधिकम् ब.